दविद्युतत् (ऋ. ६.१६.४५) इति – द्युतेः यङ्लुगन्तस्य शतरि अभ्यासस्य सम्प्रसारणाभावः, अत्त्वम्, विगागमश्च निपात्यते ।

तरित्रतः इति – तरतेः शतरि श्लौ षष्ठ्येकवचने अभ्यासस्य रिगागमः निपात्यते ।

सरीसृपतम् इति – सृपेः शतरि श्लौ द्वितीयैकवचने अभ्यासस्य रीगागमः निपात्यते ।

वरीवृजत् (ऋ. ७.२४.४) इति – वृजेः शतरि श्लौ रीगागमः निपात्यते अभ्यासस्य ।

मर्मृज्य इति – मृजेः लिटि णलि अभ्यासस्य रुगागमः धातोश्च युगागमो निपात्यते । ततो 'मृजेर्वृद्धिः' (७.२.११४/२४७३) न भवति, अलघूपधत्वात् । लघूपधगुणे प्राप्ते वृद्धिरारभ्यते ।

आगनीगन्ति इति – आङ्पूर्वस्य गमेर्लटि श्लौ अभ्यासस्य चुत्वाभावः नीगागमश्च निपात्यते । '[1]वक्ष्यन्ती वेदागनीगन्ति कर्णम्' (ऋ. ६.७५.३) । इतिकरणमेवंप्रकाराणामन्येषामप्युपसङ्ग्रहार्थम् ॥

## उरत् । (६६/२२४४)

ऋवर्णान्तस्य अभ्यासस्य [2]अकारादेशो भवति । ववृते । ववृधे । शशृधे । नर्नर्ति, नरिनर्ति, नरीनर्ति इत्येवमादौ 'अभ्यासविकारेषु [3]अपवादो नोत्सर्गान् विधीन् बाधते' (व्या.प. २३) इति उः अदत्वे कृते रुगादय आगमाः क्रियन्ते ॥

## द्युतिस्वाप्योः सम्प्रसारणम् । (६७/२३४४)

द्युति स्वापि इत्येतयोः अभ्यासस्य सम्प्रसारणं भवति । [4]विदिद्युते । व्यदिद्युतत् । विदिद्योतिषते । विदिद्युतिषते । विदेद्युत्यते । स्वापेः – सुष्वापयिषति । स्वापिः ण्यन्तो गृह्यते, तस्य अभ्यासनिमित्तेन प्रत्ययेन आनन्तर्ये सति सम्प्रसारणमिष्यते । इह न भवति, स्वापयतेर्ण्वुल् स्वापकः, तस्मात् क्यचि स्वापकीयति, स्वापकीयतेः सन्–सिष्वापकीयिषति ॥

## व्यथो लिटि । (६८/२३६३)

व्यथेर्लिटि परतोऽभ्यासस्य सम्प्रसारणं भवति । विव्यथे, विव्यथाते, विव्यथिरे । हलादिः शेषेण (७.४.६०/२१७९) यकारस्य निवृत्तौ प्राप्तायां सम्प्रसारणं क्रियते, वकारस्य[5] 'न संप्रसारणे संप्रसारणम्' (६.१.३७/३६३) इति प्रतिषिध्यते । लिटि इति किम् ? वाव्यथ्यते ॥

---

1. वक्ष्यते ङ. 2. अदादेशो इ. 3. अपवादाः नोत्सर्गविधीन् बाधन्ते ङ.क.इ. 4. विदिद्युते नास्ति इ.
5. तु इत्यधिकम् क.